इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।

निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥ ५.१९ ॥

ihaiva tairjitaḥ sargo yeṣāṁ sāmye sthitaṁ manaḥ |
nirdoṣaṁ hi samaṁ brahma tasmād brahmaṇi te sthitāḥ || 5.19||

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।

स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥ ५.२० ॥

na prahṛṣyetpriyaṁ prāpya nodvijetprāpya cāpriyam |
sthirabuddhirasammūḍho brahmavid brahmaṇi sthitaḥ || 5.20||

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।

स ब्रह्मयोगयुक्तात्मा सुखमक्शयमश्नुते ॥ ५.२१ ॥

bāhyasparśeṣvasaktātmā vindatyātmani yatsukham |
sa brahmayogayuktātmā sukhamakśayamaśnute || 5.21||

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।

आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ ५.२२ ॥

ye hi saṁsparśajā bhogā duḥkhayonaya eva te |
ādyantavantaḥ kaunteya na teṣu ramate budhaḥ || 5.22||

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्शणात् ।

कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ ५.२३ ॥

śaknotīhaiva yaḥ soḍhuṁ prākśarīravimokśaṇāt |
kāmakrodhodbhavaṁ vegaṁ sa yuktaḥ sa sukhī naraḥ || 5.23||